# Shri Radha Namavali

# શ્રીરાધાનામાવલિઃ

## Document Information

Text title : Shri Radha Namavali

File name : rAdhAnAmAvaliH.itx

Category : devii, moropanta, nAmAvalI, rAdhA

Location : doc_devii

Author : Mayurakavi or Moropanta

Proofread by : Rajesh Thyagarajan

Description/comments : Stotras composed by Moropanta mayUrakavi

Latest update : December 23, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 23, 2023

*sanskritdocuments.org*

# શ્રીરાધાનામાવલિઃ

(* અપૂર્ણા)
શ્રીકૃષ્ણદયિતા શ્રીડ્યા શ્રીકણ્ઠસ્તુતસદ્ગુણા ।
શ્રીમતી શ્રીદપન્ધાન્નિર્વિધિમાતા સુરાર્ચિતા ॥ ૧॥

રાધા મહાસતી માન્યા પુણ્યકીર્તિસુધાસરિત્ ।
ભદ્રાદિતિસ્નુષાખ્યાતા દેવી ત્રૈલોક્યસુન્દરી ॥ ૨॥

વ્યાસાદિસત્કવિસ્તવ્યા શુકયોગીન્દ્રવર્ણિતા ।
ભગવત્સસ્કૃતારામા સુભગા કોટિસંસ્તુતા ॥ ૩॥

મધુભિન્મોહિની મુખ્યા માનિની મધુરાકૃતિઃ ।
લલના લલિતાનન્દપ્રાપ્તાશીર્વૃષભાનુજા ॥ ૪॥

યશોદાલાલિતા લક્ષ્મીસપત્ની લક્ષણાશ્રયા ।
રાજગોપાલલીલોત્કા ગોપીવૃન્દશિરોમણિઃ ॥ ૫॥

કૃષ્ણદર્શનસર્વસ્વા કૃષ્ણસર્વસ્વદર્શના ।
વાસુદેવસખી પુણ્યા વરેણ્યપરદા વરા ॥ ૬॥

ધરાલિરાર્યા સ્વાર્તિઘ્ની સદારાધ્યા સનાતની ।
ગોલોકવાસિની નિત્યાનન્દા નન્દાત્મજાનુગા ॥ ૭॥

નર્મદા શર્મદા પ્રાજ્ઞા પ્રભૂતગુણશાલિની ।
પ્રસન્નવદના પ્રાજ્યલાવણ્યા પ્રભુસુપ્રિયા ॥ ૮॥

પુરાણપુરુષપ્રીતા પરબ્રહ્મપ્રસાદિની ।
બૃહત્કીર્તિઃ પરબ્રહ્મસહચર્યતિગૌરવા ॥ ૯॥

કલિન્દજાપ્રિયસખી કલિકલ્મષનાશિની ।
મહાવિદગ્ધા કાલિન્દીતીરકુઞ્જવિહારિણી ॥ ૧૦॥

કલાવતી રાસરક્તા રમ્યાકૃતિરુદારધીઃ ।

ગોવિન્દાઙ્કાસનાસીના ગોવિન્દાશ્લેષનિર્વૃતા ॥ ૧૧॥

વિલાસિની વિશાલાક્ષી મદિરાક્ષી મદાલસા ।
તન્વી તનૂદરી સુભ્રૂઃ સુમુખી સુદતી સુવાક્ ॥ ૧૨॥

સુકુમારી સુખખનિઃ સુતનુઃ સુજ્ઞસશ્રુતાતા ।
સુકેશી સુપ્રભા સુજ્ઞા સુમાસીરપ્રજાવતી ॥ ૧૩॥

સુવર્ણવર્ણા સુમતિઃ સુમનોલઙ્કૃતાકૃતિઃ ।
કુઞ્જગા કુઞ્જરગતિઃ કુન્દદામવિભૂષિતા ॥ ૧૪॥

કુમ્ભસ્તની કુઙ્કુમાભા કુન્તલાલિજિતાલિની ।
વેણુનાદહતસ્વાન્તા કાન્તકાન્તિઃ કલધ્વનિઃ ॥ ૧૫॥

કાન્તકલ્પિતકલ્પદ્રુમસૂનાનલ્પપ્રગા (?) ।
કર્ણપૂરીકૃતપ્રેષ્ઠપ્રેમાર્પિતશિખિચ્છદા ॥ ૧૬॥

વંશતીષ્ટાર્વંશભૂષા હંસગદ્ગદભાષિણી ।
શ્રીરાઽભિસારિકા નૈકયુક્તવેષા પ્રિયંવદા ॥ ૧૭॥

સમયજ્ઞા પુણ્યશીલા વેદજ્ઞા વન્દ્યવન્દિતા ।
સુરઙ્ગનાગીતકેલિર્ગુણાઢ્યા ગણિસઙ્ગતા ॥ ૧૮॥

ગન્ધર્વગીતચરિતા મેનકાદ્યપ્સરઃસ્તુતા ।
સર્વશીકૃતસરકારા ઘૃતાચીરચિતાઞ્જલિઃ ॥ ૧૯॥

રમ્ભાસંવીજિતાપાદપદ્મપ્રહ્વા તિલોત્તમા ।
missing
ગોપીશ્વરી ગોપલક્ષ્મીર્ગોમતી ગોકુલોદ્ભવા ।
કૃષ્ણચેતોહરા કૃષ્ણસહગાનધુરન્ધરા ॥ ૨૪॥

કૃષ્ણસ્કન્ધાર્પિતભુજા કૃષ્ણાસ્થનિહિતેક્ષણા ।
કૃષ્ણાનનાત્તતામ્બૂલા કૃષ્ણાશ્લેષનિમીલિતા ॥ ૨૫॥

કૃષ્ણસ્તુતા કૃષ્ણહૃતા કૃષ્ણચિત્તપ્રમાથિની ।
કૃષ્ણાનુકારકુશલા કૃષ્ણપ્રાણેશ્વરીશ્વરી ॥ ૨૬॥

રત્યુત્તમા રતીશાક્ષી રસશ્રેષ્ઠૈકમાનસા ।
રાત્રીશરશ્મિધવલા ધવલામ્બરધારિણી ॥ ૨૭॥

તમિસ્રદીપિકાકાન્તિસ્તારુણ્યામૃતનિમ્નગા ।

કાત્યાયન્યર્ચનપરા કૃષ્ણેભાલાનદૃક્છટા ॥ ૨૮॥

ગમ્ભીરનાભિર્ગમ્ભીરભાવા ગમ્ભીરભાષણા ।
કૃષ્ણપ્રસાધિતા કૃષ્ણહસ્તલબ્ધવિશેષકા ॥ ૨૯॥

સ્તનભારનમન્મધ્યા નખદન્તક્ષતાઞ્ચિતા ।
પ્રેમક્રીતાચ્યુતા પ્રાજ્યપ્રીતપીતામ્બરપ્રભુઃ ॥ ૩૦॥

પક્ષ્મલાક્ષી પનપત્રવ્યજનાનિલસેવિની ।
પુરુષાયિતસમ્પ્રીતપ્રિયાકૃષ્ટમનોઘના ॥ ૩૧॥

વિહારિણી વિશદધીર્વિશ્વવાહૃવિનોદિની ।
વીક્ષાવિધ્વસ્તસ્વવિપદ્ વિષ્ણુસાક્ષાકૃતિપ્રવા ॥ ૩૨॥

દીર્ઘદૃષ્ટિદગ્ધદાસદૈન્યા વિશ્વસ્તવત્સલા ।
ધર્મલભ્યા ધૈર્યદાત્રી ધુતારિર્ધૂપિતાલકા ॥ ૩૩॥

ફણીન્દ્રતલ્પા ફલિતા સ્ફારભા સ્ફટિકદ્વિજા ।
યજ્ઞસિદ્ધિર્યશોરાશિર્યતિસેવ્યા યમાધિદા ॥ ૩૪॥

યતીષ્ટદા યત્નદૃશ્ય યોગિધ્યેયાઽથ નાજિતા(?) ।
યદુનન્દનયત્નાત્તા ॥ ।પતિગમીરહૃત્ ॥ ૩૫॥

મોહહન્ત્રી મોહદાત્રી મોમાસાવિગ્ચ્યુપાસિતા ।
મોહિની મોચિતાસઙ્ખ્યા મોઘાહિતમનોરથા ॥ ૩૬॥

ઉરુક્રમાનતિક્રાન્તમાનોર્વ્યુન્નતમસ્તકા ।
ઉદ્યોગિન્યુદ્ધતાપાઙ્ગચ્છટોપદ્રવનાશિની ॥ ૩૭॥

ઉદ્દામરૂપસમ્પત્તિરુલ્લસન્મણિમેખલા ।
ઉત્કણશ્રીરુદાત્તર્ધિરુપસ્થિતમહોદયા ॥ ૩૮॥

ઉદારોદાહૃતકથા પ્રશસ્તિરુચિતોચિતા ।
હર્યક્ષમધ્યા હરિણીપ્રેક્ષણા હીરમણ્ડના ॥ ૩૯॥

હેલાનિર્જિતદિવ્વસ્ત્રીહેમતાલફલસ્તની ।
કૃષ્ણહૃસ્પઞ્જરશુકી કૃષ્ણમેઘશતહ્રદા ॥ ૪૦॥

કૃષ્ણચેતોઙ્ગણનટી કૃષ્ણસત્તરુસલ્લતા ।
કૃષ્ણલોચનકર્પૂરશલાકાયિતવિગ્રહા ॥ ૪૧॥

શ્રીકૃષ્ણશશભૃજ્જ્યોત્સ્ના શ્રીકૃષ્ણદ્યુમણિદ્યુતિઃ ।
શ્રીકૃષ્ણબ્રહ્મસાવિત્રી શ્રીકૃષ્ણેશ્વરપાર્વતી ॥ ૪૨॥

શ્રીકૃષ્ણાબ્ધિમહાસિન્ધુઃ શ્રીકૃષ્ણામ્નાયસત્ક્રિયા ।
શ્રીકૃષ્ણહિમભૃન્મેના શ્રીકૃષ્ણૈરાવણાભ્રમુઃ ॥ ૪૩॥

શ્રીકૃષ્ણદેવેન્દ્રશચી કૃષ્ણશ્રીરામજાનકી ।
શ્રીકૃષ્ણશૂરાસિલતા શ્રીકૃષ્ણબ્રાહ્મણશ્રુતિઃ ॥ ૪૪॥

કૃષ્ણહૃચ્ચાતકપ્રાવૃટ્ કૃષ્ણબર્હ્યભ્રમાલિકા ।
ગોવિન્દચક્ષુસ્તૃષિતચકોરસ્મિતચન્દ્રિકા ॥ ૪૫॥

પુણ્યશ્લોકપ્રણયિની પરમાત્મપ્રલોભિની ।
શારદિદ્વ્રીડદાસ્યા શારદાતિવિશારદા ॥ ૪૬॥

શ઼ૃઙ્ગારસિન્ધુલહરી શ્રૃઙ્ગારારણ્યસિંહિકા ।
શ઼ૃઙ્ગારેન્દુશરદ્રાકા શ્રૃઙ્ગારાભ્યુદયોદ્ભવા ॥ ૪૭॥

અસઙ્ખ્યપીતોર્વરિતાઽનન્તપુણ્યકથાસુધા ।
અનાદિનિધના દ્યોત્યા છદ્મબલ્લવદારિકા ॥ ૪૮॥

શાશ્વન્નિઃસીમસૌભાગ્યા શશ્વદ્ભરવિદઞ્ચિતા ।
નિરન્તરાનન્દપૂર્ણા નિરન્તરનવસ્તુતિઃ ॥ ૪૯॥

પ્રહર્ષિણીરોમરાજિત્રિવલીલલિતોદરી ।
જારસ્ત્વહરજારત્વા જગત્પાવનપાવની ॥ ૫૦॥

લીલાનરાનન્તશક્તિર્લીલાકૈવલ્યજારિણી ।
યોષિલ્લલામ શ્રીમૂર્તિઃ સર્વરામાદિનાયિકા ॥ ૫૧॥

સર્વભાવવિભાવાનુભાવસાત્વિકભાવભૂઃ ।
મણિમાલામુદ્રિતાદિપુંશિરોમણ્યુરસ્થલા ॥ ૫૨॥

સ્વમુખામ્બુજસૌરભ્યલુબ્ધભૃંઙ્ગાત્તસાધ્વસા ।
દૂતીકૃતભ્રમદ્ભૃઙ્ગદુઃખદાવદવસ્મૃતિઃ ॥ ૫૩॥

દુગ્ધફેનમૃદુસ્વચ્છશય્યાતલવિહારિણી ।
સ્વાઙ્ગરાગસુગન્ધાર્કકન્યાજલવિહારિણી ॥ ૫૪॥

સ્વભાવભવ્યસૌરભ્યા સહજદ્યુત્યલઙ્કૃતા ।
અશિક્ષિતાતિચાતુર્યા વઞ્ચનાઞ્જિતલોચના ॥ ૫૫॥

દામોદરોરઃશયના કૃષ્ણબાહૂપધાનકા ।
કૃષ્ણોત્તરીયવ્યજના કૃષ્ણાઙ્ઘ્રિનખદર્પણા ॥ ૫૬॥

શ્રુતિસ્તુતસ્તુતગુણા જ્ઞાતિમાનિતમાનિતા ।
યોગિધ્યેયધ્યેયમૂર્તિર્વિશ્વપૂજિતપૂજિતા ॥ ૫૭॥

વૃત્તોન્મતારક્તનખા વિદ્યોતન્મણિમુદ્રિકા ।
મહાવિભૂતિમાનાર્હા મહતી મન્મથારણિઃ ॥ ૫૮॥

રાજરામા રતિશ્વશ્રૂર્ગુર્વી કૃષ્ણામ્રકોકિલા ।
નિત્યપ્રાપ્તાસઙ્ગસઙ્ગા નિરાતઙ્કા નિરઞ્જના ॥ ૫૯॥

નિર્નિમેષા નિર્વિશેષા નિરીહાર્ચા નિરામયા ।
સિન્દૂરગર્ભસીમન્તા સિન્દૂરતિલકાલિકા ॥ ૬૦॥

સીમન્તિની સૃષ્ટિસીમા+સીતિક્રાન્તવૈભવા (?) ।
ભામિની શાલિની શ્યામા મેઘશ્યામા તિલાલસા ॥ ૬૧॥

મહામણ્યઙ્ગદભુજા મણિકાઞ્ચનકઙ્કણા ।
અમૃતસ્રાવિતાટઙ્કા મુક્તાચોલા સુવાસિની ॥ ૬૨॥

વરારોહેભનાસોરુર્નતભ્રૂર્મત્તકાશિની ।
નિત્યાનન્દસ્વરૂપાનુભૂતિર્ભૂતિલકાયિતા ॥ ૬૩॥

કૃષ્ણકર્ણામૃતોદન્તા કૃષ્ણનેત્રાલિપદ્મિની ।
હાતશ્રીકૃષ્ણરમિતા યમિતાપદ્મકીર્તમા ॥ ૬૪॥

દેદીપ્યમાના દુર્દૈવદુર્લભસ્મૃતિવન્દના ।
દયમાનમના દાસત્રાસનાશધૃતવ્રતા ॥ ૬૫॥

ભક્તેક્ષણક્ષણપ્રાલ્પપ્રાણપ્રિયતમાસ્મૃતિઃ ।
અનન્યભક્તસર્વસ્વા નિજભક્તાભિમાનિની ॥ ૬૬॥

ભુક્તિમુક્તિપ્રદપદા ભુજપાશસિતાચ્યુતા ।
નેત્રાધરપ્રભાગુઞ્જીભૂતનાસાગ્રમૌક્તિકા ॥ ૬૭॥

નિરીહેહાકરીરમ્ભરીતિરીશ્વરરીતિભૃત્ ।
શુદ્ધસત્વોત્કર્ષવતી સર્વસાત્વિકસન્નુતા ॥ ૬૮॥

બ્રહ્માણ્ડમણ્ડપસ્તમ્ભસ્તમ્ભના સકલેક્ષણા ।

વંશીનિનાદશ્રવણક્ષણત્યક્તાશનાલયા ॥ ૬૯॥

મુરલીનાદજીવાતુર્મુરલીધ્વનિનિસ્રપા ।
સાયંવેણુરવપ્રીતા પ્રાતર્વેણુરવાકુલા ॥ ૭૦॥

દિવાવંશીકથાનીતયુગયામચર્તુદયા ।
કૃષ્ણચુમ્બિતવંશીર્ષ્યા વંશીકુત્સાકૃતાદરા ॥ ૭૧॥

વંશીસપત્ની વંશ્યાપ્તમહાભાગ્યોત્સવાસહા ।
વંશ્યાયત્તપ્રિયપ્રાપ્તિર્વંશીદૂતીપ્રબોધિતા ॥ ૭૨॥

વંશીસખીસમાહૂતા વંશીજ્વરહરૌષધિઃ ।
વંશીનાદનિરસ્તાધિર્વંશીલજ્જાસરિત્તારિઃ ॥ ૭૩॥

વનમાલિપરિષ્વઙ્ગાઽજ્ઞાતનિર્ગતયામિની ।
ભગવદ્વિરહાઽશીતરશ્મીભૂતસુધાકરા ॥ ૭૪॥

ભીમસમાગમાનન્દચન્દ્રીભૂતદિવાકરા ।
ભગવરસઙ્ગમોત્કર્ષપલ્લવીકૃતબલ્લવી ॥ ૭૫॥

મૃદ્ધઙ્ગી નાગનાસોરુઃ કુઞ્જારણ્યાધિદેવતા ।
ગુઞ્જદ્ભૃઙ્ઘનધ્વાન્સપુઞ્જકુઞ્જમહર્ષિણી ॥ ૭૬॥

વૈકુણ્ઠીકૃતકાલિન્દીતટારણ્યલતાગૃહા ।
નિકુઞ્જબન્ધુઃ સર્વાઙ્ગમઞ્જુલા વઞ્જુલાલયા ॥ ૭૭॥

વર્શવદરમારઙ્ગા ગઙ્ગાચ્છાગુણગર્વિતા ।
કીરનાસા ચક્રવાકસ્તની ખઞ્જનલોચના ॥ ૭૮॥

જપાપ્રસૂનરસના વિદ્રુમાધરપલ્લવા ।
ગ્રીષ્મકાલહિમસ્પર્શા હિમકાલોષ્ણવિગ્રહા ॥ ૭૯॥

દામોદરકરસ્પર્શશ્લથનીવિઃ સ્ખલદ્ધતિઃ ।
શ્લક્ષ્ણદૃષ્ટિદૃઽસ્નેહા દુગ્ધમુગ્ધસ્મિતાધરા ॥ ૮૦॥

ભક્તપ્રેમદ્રવચ્ચિત્તા ભગવદ્ભક્તિજીવના ।
ગોવિન્દસખ્યપ્રખ્યાતા દામોદરમણિપ્રભા ॥ ૮૧॥

કૃષ્ણલક્ષ્મીભ્રમકરીગોપાલફણભૃન્મણિઃ ।
કૃષ્ણબદ્ધોલ્લસદ્વેણી કેશવાક્ષ્યર્ષિતાઞ્જના ॥ ૮૨॥

કૃષ્ણારચિતપત્રાલિઃ કૃષ્ણદત્તાઙ્ઘ્રિયાવકા ।
કૃષ્ણોત્તરીયવ્યજના કૃષ્ણોત્સઙ્ગવરાસના ॥ ૮૩॥

ભગવત્કૌસ્તુભાદર્શા ગોવિન્દાધરકજ્જલા ।
માનગ્રહનમત્કૃષ્ણાલિકલગ્નાઙ્ઘ્રિયાવકા ॥ ૮૪॥

કૃષ્ણાનિમિષદૃક્પીતવદનામ્બુરુહાસવા ।
પૂર્ણકામમનઃકામ્યા સ્વાત્મારામમનોરમા ॥ ૮૫॥

સદાતૃપ્તસદારબ્ધકેલિર્નિત્યહરીહિતા ।
ગુહગમ્યા ગુણાતીતા સદ્ગુણપ્રતિપાદિની ॥ ૮૬॥

ચુમ્બનોત્કપ્રિયસ્પૃષ્ટચિબુકા ચપલેક્ષણા ।
કૃષ્ણમાર્જિતરત્યન્તમર્મબિન્દુભૃદાનના ॥ ૮૭॥

શ્રીકાન્તસ્ય પદન્યસ્તક્રીડા બિસ્રસ્તભૂષણા ।
શ્રિયપાદામ્બુજાપાસ્તવિન્યસ્તમણિનૂપુરા ॥ ૮૮॥

કૃષ્ણાર્પિતસ્વઙ્ગરાગા કૃષ્ણબદ્ધનગમ્બરા ।
પ્રસાધકપ્રેષ્ઠદત્તરસાજ્ઞાપારિતોષિકા ॥ ૮૯॥

દન્તકાન્તિજિતજ્યોત્સ્ના સુધોત્તમરસાધરા ।
સ્વપાદપદ્મસૌભાગ્યજિતસૌગન્ધિકામ્બુજા ॥ ૯૦॥

કલ્પદ્રુપલ્લવાનલ્પસ્મયઘ્નકરપલ્લવા ।
વાઙ્મૂકીકૃતગર્વાઢ્યશારદાશુકસારિકા ॥ ૯૧॥

કૃષ્ણચ્છાયાસહચરી કૃષ્ણદૃષ્ટ્યાસ્પદાનના ।
યજ્ઞપત્ની પૂજ્યચિત્રાનન્દસર્વસ્વરક્ષિણી ॥ ૯૨॥

પુત્રરઞ્જનસમ્પ્રીતયશોદાવિહિતાદરા ।
વ્રજેશ્વરાર્પિતાપત્યનિર્વિશેષાઙ્કસંસ્થિતિઃ ॥ ૯૩॥

કૃષ્ણાસ્યાર્પિતસંયાવા રાજગોપાલભોજિતા ।
પ્રીતિપીતપ્રીતપીતચેલેષત્પીતપાયસા ॥ ૯૪॥

કૃષ્ણાર્પિતસ્વનેપથ્યા કૃષ્ણનેપથ્યધારિણી ।
?? અપૂર્ણા
ઇતિ શ્રીરામનન્દનમયૂરેશ્વરકૃતા શ્રીરાધાનામાવલિઃ સમાપ્તા ।

* ઇયનામાવલિઃ કવિલિખિતા ચાસમ્પૂર્ણા ચોપલભ્યતે । નામાપ્યસ્યા આવત્યા અસ્માભિરેવ વિષયમવલોચ્ય પ્રકલ્પિતમ્ । બહુષુ સ્થલેષ્વસ્યા માતૃકા યન્ત્રાદિસાહાય્યેનાપિ નાવગન્તું શક્યેતિ તત્ર દુરૂહ એવાર્થઃ । ઇતરત્ર તુ સુગમ એવ નામ્નામર્થ ઇત્યુપેક્ષ્ય વ્યાખ્યાનમ્ ।

Proofread by Rajesh Thyagarajan

*Shri Radha Namavali*

pdf was typeset on December 23, 2023

Please send corrections to *sanskrit@cheerful.com*